# नारायण कवचम्

राजोवाच ।
यया गुप्तः सहस्राक्षः सवाहान् रिपु सैनिकान् ।
क्रीडन्निव विनिर्जित्य त्रिलोक्या बुभुजे श्रियम् ॥ १॥

भगवं स्तन् ममाख्याहि वर्म नारायणात्मकम् ।
यथा ततायिनः शत्रून् येन गुप्तोऽ जयन्मृधे ॥ २॥

श्रीशुक उवाच ।
वृतः पुरोहितस् त्वाष्ट्रो महेन्द्रा यानुपृच्छते ।
नारायणाख्यं वर्माह तदिहैक मनाः शृणु ॥ ३॥

श्रीविश्वरूप उवाच ।
धौतांघ्रि पाणि राचम्य सपवित्र उदङ्मुखः ।
कृत स्वाङ्ग कर न्यासो मन्त्राभ्यां वाग्यतः शुचिः ॥ ४॥

नारायण मयं वर्म सन्नह्येद् भय आगते ।
दैवभूतात्म कर्मेभ्यो नारायण मयः पुमान्॥ ५॥

पादयो र्जानुनो रूर्वोर् उदरे हृद्यथो रसि ।
मुखे शिरस् यानुपूर्व्यात् ओङ्कारादीनि विन्यसेत् ॥ ६॥

ॐ नमो नारायणायेति विपर्यय मथापि वा ।

करन्यासं ततः कुर्यात् द्वादशाक्षर विद्यया ॥ ७॥

प्रणवादि यकारान्तम् अङ्गुल् यङ्गुष्ठ पर्वसु ।
न्यसेद् धृदय ॐकारं विकार मनु मूर्धनि ॥ ८॥

षकारंतु भ्रुवो र्मध्ये णकारं शिखया दिसेत् ।
वेकारं नेत्रयोर् युज्यान् नकारं सर्व सन्धिषु ॥ ९॥

मकार मस्त्र मुद्दिश्य मन्त्र मूर्ति र्भवेद्बुधः ।
सविसर्गं फडन्तं तत् सर्वदिक्षु विनिर् दिशेत् ॥ १०॥

ॐ विष्णवे नम इति।
आत्मानं परमं ध्यायेद् ध्येयं षट्शक्तिभिर् युतम् ।
विद्या तेजस् तपोमूर्तिं इमं मन्त्र मुदाहरेत् ॥ ११॥

ॐ हरिर् विदध्यान् मम सर्व रक्षां न्यस्तांघ्रि पद्मः पतगेन्द्र पृष्ठे ।
दरारि चर्मासि गदेषु चाप पाशान् दधानोऽष्ट गुणोऽष्ट बाहुः ॥ १२॥

जलेषु मां रक्षतु मत्स्यमूर्तिः यादो गणेभ्यो वरुणस्य पाशात् ।
स्थलेषु माया वटु वामनोऽव्यात् त्रिविक्रमः खेऽवतु विश्वरूपः ॥ १३॥

दुर्गेष् वटव्याजि मुखादिषु प्रभुः पायान् नृसिंहोऽसुर यूथपारिः ।
विमुञ्चतो यस्य महाट्टहासं दिशो विनेदुर् न्यपतंश्च गर्भाः ॥ १४॥

रक्षत्वसौ माऽध्वनि यज्ञ कल्पः स्वदंष्ट्र योन्नीत धरो वराहः ।
रामोऽद्रिकूटेष् वथ विप्रवासे सलक्ष्मणोऽव्याद् भरताग्रजो माम् ॥ १५॥

मामुग्र धर्मा दखिलात् प्रमादान् नारायणः पातु नरश्च हासात् ।
दत्तस्त्वयोगा दथ योगनाथः पायाद् गुणेशः कपिलः कर्मबन्धात् ॥ १६॥

सनत्कुमारोऽ वतु कामदेवाद् हयग्रीवो मां पथि देव हेलनात् ।
देवर्षिवर्यः पुरुषार्च नान्तरात् कूर्मो हरिर्मां निरयादशेषात् ॥ १७॥

धन्वन्तरिर् भगवान्पात् वपथ्यात् द्वन्द्वाद् भयादृषभो निर्जितात्मा ।
यज्ञश्च लोका दवताज् जनान्ताद् बलो गणात् क्रोध वशा दहीन्द्रः ॥ १८॥

द्वैपायनो भगवान प्रबोधात् बुद्धस्तु पाषण्ड गणात् प्रमादात् ।
कल्किः कलेः कालमलात् प्रपातु धर्मावना योरु कृतावतारः ॥ १९॥

मां केशवो गदया प्रात रव्याद् गोविन्द आसङ्गव मांत्तवेणुः ।
नारायणः प्राह्ण उदात्तशक्तिः मध्यन् दिने विष्णुररीन्द्र पाणिः ॥ २०॥

देवोऽपराह्णे मधुहोग्र धन्वा सायन् त्रिधामाऽ वतु माधवो माम् ।
दोषे हृषीकेश उतार्धरात्रे निशीथ एकोऽवतु पद्मनाभः ॥ २१॥

श्रीवत् सधामाऽपर रात्र ईशः प्रत्यूष ईशोऽसि धरो जनार्दनः ।
दामोदरोऽ व्यादनु सन्ध्यं प्रभाते विश्वेश्वरो भगवान् कालमूर्तिः ॥ २२॥

चक्रं युगान्तानल तिग्मनेमि भ्रमत् समन्तात् भगवत् प्रयुक्तम् ।
दन्दग्धि दन्दग्ध्यरि सैन्य माशु कक्षं यथा वात सखो हुताशः ॥ २३॥

गदेऽ शनि स्पर्शन विस्फुलिङ्गे निष्पिण्ढि निष्पिण्ढ्यजित प्रियासि ।
कूष्माण्ड वैनायक यक्ष रक्षो भूत ग्रहांश्चूर्णय चूर्णयारीन् ॥ २४॥

त्वं यातुधान प्रमथ प्रेत मातृ पिशाच विप्र ग्रह घोर दृष्टीन् ।
धरेन्द्र विद्रावय कृष्ण पूरितो भीमस्वनोऽरेर् हृदयानि कम्पयन् ॥ २५॥

त्वं तिग्म धारासि वरारि सैन्यम् इश प्रयुक्तो मम छिन्धि छिन्धि ।
चक्षूंषि चर्मन् शतचन्द्र छादय द्विषामघानां हर पाप चक्षुषाम् ॥ २६॥

यन्नो भयं ग्रहेभ्योऽ भूत् केतुभ्यो नृभ्य एव च ।
सरीसृपेभ्यो दंष्ट्रिभ्यो भूतेभ्योऽ घेभ्य एव च ॥ २७॥

सर्वाण् येतानि भगवन् नामरूपास्त्र कीर्तनात् ।
प्रयांतु संक्षयं सद्यो येऽन्ये श्रेयः प्रतीपकाः ॥ २८॥

गरुडो भगवांस्तोत्र स्तोभश् छन्दोमयः प्रभुः ।
रक्षत् वशेष कृच्छ्रेभ्यो विष्वक्सेनः स्वनामभिः ॥ २९॥

सर्वापद्भ्यो हरेर् नाम रूप यानायु धानि नः ।
बुद्धीन्द्रिय मनः प्राणान् पान्तु पार्षद भूषणाः ॥ ३०॥

यथा हि भगवा नेव वस्तुतः सदसच्च यत् ।
सत्ये नानेन नः सर्वे यान्तु नाश मुपद्रवाः ॥ ३१॥

यथैकात्म्यानु भावानां विकल्प रहितः स्वयम् ।
भूषणायुध लिङ्गाख्या धत्ते शक्तीः स्वमायया ॥ ३२॥

तेनैव सत्य मानेन सर्वज्ञो भगवान् हरिः ।
पातु सर्वैः स्वरूपैर्नः सदा सर्वत्र सर्वगः ॥ ३३॥

विदिक्षु दिक्षूर्ध्व मधः समन्तात् अन्तर् बहिर् भगवान् नारसिंहः ।
प्रहापयँ लोक भयं स्वनेन स्वतेजसा ग्रस्त समस्त तेजाः ॥ ३४॥

मघवन् निद माख्यातं वर्म नारायणात्मकम् ।
विजेष्यस् यञ्जसा येन दंशितोऽ सुर यूथपान् ॥ ३५॥

एतद् धारयमाणस्तु यं यं पश्यति चक्षुषा ।
पदा वा संस्पृशेत् सद्यः साध्वसात्स विमुच्यते ॥ ३६॥

न कुतश्चिद् भयं तस्य विद्यां धारयतो भवेत् ।
राज दस्यु ग्रहादिभ्यो व्याध्यादिभ्यश्च कर्हिचित् ॥ ३७॥

इमां विद्यां पुरा कश्चित् कौशिको धारयन् द्विजः ।
योग धारणया स्वाङ्गं जहौ स मरुधन्वनि ॥ ३८॥

तस्योपरि विमानेन गन्धर्व पति रेकदा ।
ययौ चित्ररथः स्त्रीभिः वृतो यत्र द्विजक्षयः ॥ ३९॥

गगनान् न्यपतत् सद्यः सविमानो ह्यवाक् शिराः ।
स वालखिल्य वचनात् अस्थीन् यादाय विस्मितः ॥ ४०॥
प्रास्य प्राची सरस्वत्यां नात्वा धामस्व मन्वगात् ।

श्रीशुक उवाच ।
य इदं शृणुयात् काले यो धारयति चादृतः ॥
तं नमस्यन्ति भूतानि मुच्यते सर्वतो भयात् ॥ ४१॥

एतां विद्या मधिगतः विश्वरूपाच् छतक्रतुः ।
त्रैलोक्य लक्ष्मीं बुभुजे विनिर्जित्य मृघेऽसुरान् ॥ ४२॥

। इति श्रीनारायण कवचम् स्तोत्रं सम्पूर्णम् ।